योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०४५

श्रीसरस्वत्युवाच ।

विदूरथस्ते भर्तैष तनुं त्यक्त्वा रणाङ्गणे ।

तदेवान्तःपुरं प्राप्य तादृगात्मा भविष्यति ।। २

श्रीवसिष्ठ उवाच ।

इत्याकर्ण्य वचो देव्या लीला सा तत्पुरास्पदा ।

पुरः प्रह्वा स्थितोवाच वचनं विहिताञ्जलिः ।। २

द्वितीयलीलोवाच ।

देवी भगवती ज्ञप्तिर्नित्यमेवार्चिता मया ।

स्वप्ने संदर्शनं देवी सा ददाति निशासु मे ।। ३

सा यादृश्येव देवेशि तादृश्येव त्वमम्बिके ।

तन्मे कृपणकारुण्याद्वरं देहि वरानने ।। ४

श्रीवसिष्ठ उवाच ।

इत्युक्ता सा तदा ज्ञप्तिः स्मृत्वा तद्भक्तिभावनम् ।

इदं प्रसन्ना प्रोवाच तां लीलां तत्पुरास्पदाम् ।। ५

श्रीदेव्युवाच ।

अनन्यया भावनया यावज्जीवमजीर्णया ।

परितुष्टास्मि ते वत्से गृहाणाभिमतं वरम् ।। ६

तद्देशलीलोवाच ।

रणाद्देहं परित्यज्य यत्र तिष्ठति मे पतिः ।

अनेनैव शरीरेण तत्र स्यामेतदङ्गना ।। ७

श्रीदेव्युवाच ।

एवमस्तु त्वयाऽविघ्नं पूजितास्मि सुते चिरम् ।

अनन्यभावया भूरि पुष्पधूपसपर्यया ।। ८

श्रीवसिष्ठ उवाच ।

अथ तद्देशलीलायां फुल्लायां तद्वरोदयात् ।

पूर्वलीलाब्रवीद्देवीं संदेहलुलिताशया।। ९

पूर्वलीलोवाच ।

ये सत्यकामाः सन्त्येवंसंकल्पा ब्रह्मरूपिणः ।

त्वादृशाः सर्वमेवाशु तेषां सिद्ध्यत्यभीप्सितम् ।। १०

तत्तेनैव शरीरेण किमर्थं नाहमीश्वरि ।

लोकान्तरमिदं नीता तं गिरिग्रामकं वद ।। ११

श्रीदेव्युवाच ।

न किंचित्कस्यचिदहं करोमि वरवर्णिनि ।

सर्व संपादयत्याशु स्वयं जीवः स्वमीहितम् ।। १२

अहं हितं रटे ज्ञप्तिः संविन्मात्राधिदेवता ।

प्रत्येकमस्ति चिच्छक्तिर्जीवशक्तिस्वरूपिणी ।। १३

जीवस्योदेति या शक्तिर्यस्य यस्य यथा यथा ।

भाति तत्फलदा नित्यं तस्य तस्य तथा तथा ।। १४

मां समाराधयन्त्यास्तु जीवशक्तिस्तवोदिता ।

तदा भवद्यदीह स्यां मुक्तास्मीति चिरं तदा ।। १५

तेन तेन प्रकारेण त्वं मया संप्रबोधिता ।

तया युक्त्यामलं भावं नीतासि वरवर्णिनि ।। १६

अनयैव भावनया बोधितासि चिरं तदा ।

तमेवाऽर्थं प्राप्तवती सदा स्वचितिशक्तितः ।। १७

यस्य यस्य यथोदेति स्वचित्प्रयतनं चिरम् ।

फलं ददाति कालेन तस्य तस्य तथा तथा ।। १८

तपो वा देवता वापि भूत्वा स्यैव चिदन्यथा ।

फलं ददात्यथ स्वैरं नभःफलनिपातवत् ।। १९

स्वसंविद्यतनादन्यन्न किंचिच्च कदाचन ।

फलं ददाति तेनाशु यथेच्छसि तथा कुरु ।। २०

चिद्भाव एव ननु सर्गगतोऽन्तरात्मा

यच्चेतति प्रयतते च तदैति तच्छ्रीः ।

रम्यं ह्यरम्यमथवेति विचारयस्व

यत्पावनं तदवबुध्य तदन्तरास्स्व ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे ली० सत्यकामसत्यसङ्कल्पास्तिता नाम पञ्चत्वारिंशः सर्गः ।। ४५ ।।